२८

कारकव्याख्या
कारककौमुदी

नं० १२५२ – च

पत्राणि २८

॥ श्रीगणाधिपतये नमः॥ नत्वा शंभोः पदांभोजं जयरामः समासतः॥ कारकेति कार
कव्याख्यामिह संख्यावतां मुदे॥ १॥ तत्र कारकाणि कर्तृकर्मकरणसंप्रदानापा
दानाधिकरणानि षट्॥ न त्वं च तत्र न क्रियानिमित्तत्वं- चैत्रस्य तंडुलं पचतीत्यादौ सं
बंधिनि चैत्रादावतिव्याप्तेः। अनुमत्यादिप्रकाशनद्वारा संप्रदानत्वदेरिव तंडुलादि
संपादनद्वारा संबंधिनोपि पाकक्रियानिमित्तत्वात्- किंतु क्रियान्वितविभक्त्यर्था
न्वितत्वं- अस्ति च कर्तृकर्मादौ क्रियान्वितति ङ्सुब्विभक्त्यर्थान्वयः। न तूदाहृते सं
बंधिनि षष्ठ्यर्थसंबंधस्य तंडुलादिनामार्थान्वितत्वया क्रियानन्वितत्वात्- चैत्रस्य प
चतीत्यादावपि तंडुलादिपदाध्याहारेणैव बोधः॥ षष्ठ्यर्थसंबंधस्य नामार्थेनैव
क्रियायाः कर्मत्वादिनेव साकांक्षतया परस्पराकांक्षाविरहात्- ओदनस्य पाकमैत्र

१

स्य पाक इत्यादौ कर्मत्वकर्तृत्वाधिकाः षष्ठीकारकाविभक्तिरेव कर्तृकर्मणोः कृतीत्यनेननं
द्विधानात् अतएव संबंधस्य न कारकत्वं क्रियायोगाभावादिति शाब्दिकाः ४। अतएव गुरुर्वि
प्रतपस्विदुर्गतानां प्रति कुर्वीत मिलन क्लेशघ्नैरित्यादौ सा लक्ष्मीरुपकुरुते यया परेषामित्या
दौ च रोगो विपत्ता वितिनामाध्याहारेणैव बोधः ४। यदि च विनाध्याहारं तत्र क्रियापांबध्यार्थ
संबंधान्वयः प्रामाणिकस्तदा क्रियोन्वितकर्तृत्वकर्मत्वादिषट्कान्यतमान्वयित्वं कारक
त्वं बोध्यं अतएव चर्मणि द्वीपिनं हन्तीत्यादौ निमित्तादेरपि न कारकत्वमित्येता उपपदवि
भक्तयो न कारकविभक्तयः। गां पयो दोग्धि अजां ग्रामं नयतीत्यादौ गौणमुख्यकर्मद्वयम्
विलक्षणं अत्र हि द्रव्यविभागानुकूलक्रियानुकूलव्यापारविशेषः कर्तृनिष्ठो दुहेरर्थः ४
वायुर्वृक्षं पर्णं दोग्धीति वारणाय द्रवद्रव्येति मेघो गगनं जलं दोग्धीति वारणाय विशेष द्र

2 ति। विशेषो दुहाद्यनुप्रयोगगम्यः। इत्थं च ऽवऽव्येति न देयमित्यपि वदन्ति। संयोगानुकूल
क्रियानुकूलव्यापारस्तादृशो नीधात्वर्थः। तत्राद्ये विभागे गामित्यस्य क्रियायां पयः इत्यस्या
न्वयः प्रोक्तत्र विभागानुकूलपयोवृत्तिक्रियानुकूलव्यापारानुकूलफलवानिति वाक्यार्थः
। द्वितीये ग्राममित्यस्य संयोगे, ऽजामित्यस्य क्रियायामन्वयः। ग्रामवृत्तिसंयोगानुकूलाऽजा
वृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानिति वाक्यार्थः। साक्षाद्धात्वर्थतावच्छेदकानि
रूपक्रियाद्वयरूपफलान्वितान्वयिनोऽजापयसोर्मुख्यकर्मत्वं। तादृशक्रियारूपफ
लावच्छेदकविभागसंयोगरूपफलद्वयान्वितान्वयिनोर्गोग्रामयोर्गौणत्वं। उभयत्रैव धा
त्वर्थान्वितविभक्त्यर्थान्वितत्वमस्ति। फलद्वयस्यापि धात्वर्थत्वात्। अतएव कर्मद्वय
साकांक्षफलबोधकधातुत्वं द्विकर्मत्वं सूपपदं। परंतु विभागानुकूलक्रियायां दुहेः २

संयोगानुकूलक्रियानयतेरर्थः । न तु तदुभयानुकूलकर्तृव्यापारः । कर्मद्वयस्यापि वि-
भागसंयोगयोरन्वयश्च इति तन्न । पयो गवोः कर्मत्वानुपपत्तेः परसमवेतत्वस्य क्रिया-
याम भावात् । कर्मद्वयस्याप्येकत्र फलेन्वये च गौणमुख्यव्यवहारो न स्यात् । एतेन विभागा-
द्यनुकूलाकर्षणगतचेष्टैव दुहादेरर्थ इत्यपास्तं । फलद्वयाश्रयत्वे गौणमुख्यव्यवहारानापत्तेः ।
यद्यपि गामित्यस्यार्थो गोवृत्तित्वं पयस्येवान्वेतीति गौणं कर्म न लक्ष्यमिति तत्रापि न ।
गोः पयो दुह्यत इत्यत्र गोकारकत्वस्य दुरुपपादत्वात् । अजां ग्राममित्यादौ ग्रामवृत्तित्व-
स्य प्रागजाया असत्त्वेनान्वयायोगात् । कारीतः प्रयोजनीयमानामजां कारं नयतीति
प्रयोगापत्तेश्च । तत्र तत्तत्क्रियानुकूलकृतिमत्त्वं तत्तत्क्रियाकर्तृत्वं । काष्ठादौ पाकानुकूल-
व्यापारवत्त्वप्रतिसंधानेपि कर्तृपदाप्रयोजनात् । कृताकृतविभागादिना सिद्धयत्नशीलैः

केनरूधातुनात्वउंतेनसिद्धस्यकर्तृशब्दस्ययत्नाश्रयबोधकत्वाच्च॰ अचेतनेकर्तृपद
३ प्रयोगस्तुगौणः४। वृद्धिगुणतरमारम्भोत्सनादिस्याविषयकयत्नसत्त्वेपितत्क्रियाया
अनिष्पत्तौतत्तत्क्रियाकर्तृत्वाव्यवहाराद्विषयत्वंविहायानुकूलत्वमुपात्तं॰ यदिचमत्तो
तंनमयाकृतमितिव्यपदेशात्तुतदीयकृतिसाध्यस्यापिघटमध्यस्यशार्करादिनाज्ञान
स्यनकर्तृत्वंतदाविषयत्वमपिनिवेश्यंतत्साध्यत्वेन॰ तेनयागादिकृतेरुद्देश्यत्वेन
स्वर्गादिविषयकत्वेपिनयागादिकर्तुःस्वर्गादिकर्तृत्वं॰ अस्मदादिकर्तृकपाकादि
कर्तृत्वमीश्वरस्येष्टं॰ तथाविवक्षायामीशःपचतीतिप्रयोगोपीष्टएव॰ नोचेत्कार्य
त्वानवच्छिन्नजन्यतानिरूपितमसाधारणमनुकूलत्वंनिवेश्यमितिनैयायिकाः।
वैयाकरणास्तुअनभिहितेकर्तरीत्यादावचेतनेपिकर्तृपदप्रयोगात्क्रियाश्रयत्वंक

र्तृत्वं· कारककर्मादिपदघटकधातूपस्थक्रियार्थक एवाश्रयत्वमिह तत्तदाख्यातार्थद्वा
रा· तथा च पचत्याद्यसमभिव्याहृताख्यातेन पदार्थत्वान्वितपदधर्मवत्त्वं बोध्यते तद्धर्म
र्म निरूपिततद्धर्मवत्त्वं तद्धात्वर्थकर्तृत्वं· यथा पचतीत्यादौ पाकाद्यनुकूलव्यापारवत्त्वं
जानातीत्यादौ ज्ञानाश्रयत्वं नश्यतीत्यादौ नाशप्रतियोगित्वं चैत्रेण पच्यते तंडुल
इत्यादौ पाकजन्यफलाश्रयत्वं च वारणाय यगाद्यसमभिव्याहृतेनेति· चैत्रादेः कर्तृत्वं तु
पचतीत्याख्यातबोध्यधर्ममादायैवेति बोध्यं· धात्वर्थान्वितद्वितीयाद्यर्थकर्मकर
णत्वादिवारणायाख्यातेनेति· जानातीत्याद्याख्यातार्थाश्रयत्वं न पाककर्तृत्वं· हं
तीत्यत्राहिंसाश्रयत्वं न गमनकर्तृत्वमित्येतत्संपत्तये धात्वितिधात्वर्थविशेषणं।
यदि च काष्ठं पचति स्थाली पचतीत्यादिप्रयोगात् करणादीनां कर्तृत्वमिष्टं पच्या

ते ओदनः स्वयमेवेत्यादौ कर्मकर्तरि कर्मणोपि तद्दृष्टं । ओदनः स्वं पचतीत्यत्र योगस्त्वसाधकत्वा
त् । चैत्रो मैत्रं ग्रामं गमयतीत्यादावपि मैत्रादेः कर्तृत्वमिष्टमेव । उत्तरगमनानुकूलव्यापारो
दिग्दर्शितार्थः । तदनुकूलव्यापारश्च रथादेरप्यस्त्येव । तत्र णिजर्थव्यापारस्याधिगच्छतीत्याद्या
ख्यातार्थत्वात् । अनुकूलकृतिमत्त्वस्याप्यत्रसत्त्वाच्चेति । यदि च णिजर्थव्यापारे मैत्रमिष्ट
स्यस्य नान्वयः । तथात्वे धात्वर्थव्यापारस्य मैत्रनिष्ठत्वे मैत्रस्य कर्तृत्वानापत्तेः । किं तु ग
मनेच्छा मैत्रवृत्तिसंयोगानुकूलमैत्रवृत्तिक्रियानुकूलव्यापाराश्रयत्वं चाश्वैत्रस्यान्वयबोधा
त् । तथाधिगमनान्वितं वृत्तीपार्थवृत्तित्वरूपत्वेनो मैत्रस्य कर्तृत्वमपरत्ययहमिति किमा पि२
ख्यातपदेनेति विभाव्यते तदा कर्मत्वत्वविशिष्टस्य कर्तृरूपतावारणाय तदुपादेयं । न
हि कर्मत्वादेः कर्तृत्वरूपत्वेऽनभिहिते कर्तरीत्यतीयत्याद्यनुशासनार्थः संगच्छते ॥

स्त्यात्॥ ननु· स्वतंत्रः कर्त्तेति पाणिनिसूत्रात्कारकांतराप्रयोज्यत्वे सति कारकांतरप्रयो
जकत्वं कर्तृत्वं· स्वातंत्र्यं तेन पुरुषादिजन्यरूपसंयोगादिव्यापारवत्स्वरूपतत्प्रयोज्यवतः कुठारा
देर्व्युदासः इति· तन्न· ईश्वरप्रयोज्यानां बीजादीनां कर्तृत्वानापत्तेः। दंडादिजन्यसंयोगादिरूप
व्यापारवति कुलालादावव्याप्तेश्चेति दिक्· अथ किं कर्मत्वं· न कारणव्यापार्यत्वं· तद्धि क
रणजन्यव्यापारवत्त्वं· दात्रेण धान्यं लुनातीत्यादौ हस्तादिकरणव्यापार्ये दात्रादावति
व्याप्तं· नापि परसमवेतक्रियाजन्यफलशालित्वं· गामिपत्योः कर्मत्वस्य सर्वस्मिन्दे
शे स्पंदोऽस्त्येतस्मिन्स्पंदेः पूर्वापरयोः प्रसंगात्· नदी वर्द्धत इत्यादौ वृद्धेरवयवोप
यरूपायाः परंपरया फलस्य तीरप्राप्तिरूपस्याश्रये तीरे कर्मत्वापत्तेश्चेति चेत्॥ अत्र व
दंति। धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं· तादृशं च फलं गमेः संयोगस्त्यजे

र्विभागः पतेरर्थः संयोगस्तु तदवच्छिन्नस्पंदे तेषां शक्तेः स्पंदमात्रे तेषां शक्तौ पर्यायताप
5 त्तेः। स्पंदे र्ध्यधातोश्च न फलावच्छिन्नव्यापारे शक्तिरिति न कोपि दोषः॥ फलावच्छिन्नव्या
पारबोधकत्वादेवधात्वर्थस्याकृष्टज्ञानां सकर्मकत्वव्यवहारो मुख्यः॥ जानातीत्यादीनां तु नामा
र्थान्वितोद्देश्यत्वातिरिक्तविषयित्वरूपविभक्त्यर्थान्वयित्वं गौणसकर्मकत्वं। घटं जाना
तीत्यादितो घटविषयिताशालिज्ञानाश्रयतावानिति बोधात् धात्वर्थानुयोग एव च कर्म
प्रत्ययाः। अत एवास्तु ज्ञाने पि भोजनाय यतते इति प्रयोगात्। यतधात्वर्थे नामार्थान्वितस्य
न्वयार चतुर्थ्यर्थोद्देश्यत्वस्यैवान्वये पतेः सकर्मकत्वं न वा भोजनं यतते इति प्रयोगः। अत्र न्यूनं
प्रयाति विहगो दिङ्महातिमहीरुहां नस्वात्मानमिति प्रयोगात्स्वस्य धात्वर्थतावच्छेदक
संयोगविभागस्य फलशालित्वेपि कर्मत्वाभावात्परसमवेतक्रियाजन्यत्वमपि धा ५

त्वपर्याप्तावच्छेदकफले निवेश्यं । न चैवमपि मल्लो मल्लं गच्छतीत्यादावुभयोः कर्मजसंयोगरूपफल
स्य तादृशत्वात्स्वकर्तृकक्रियाकर्मत्वव्यवहारः स्वस्मिन्नस्यात् । परसमवेतया क्रियाजन्यफला
श्रयफलशालित्वं यत्र तत्र तत्क्रियाकर्मत्वस्य स्वीकारात् । इत्थं च द्वितीयादेः क्रियान्वयिपरस
मवेतत्वमप्यर्थः । परत्वं स्ववृत्त्यपर्याप्तिकक्षया सुपा स्वार्थफलान्वय्यपेक्षया कर्माख्यातेन वा
च्यते । तथा च भूमिं प्रयाति विहगो विजहाति महीरुहमित्यादितो भूमिभिन्नसमवेतभूमि
वृत्तिसंयोगजनकस्पंदानुकूलकृतिमानिति बोधः । एवं च स्वाभिन्नसमवेतस्ववृत्तिसं
योगजनकं यन्मल्लांतरवृत्तिगमनं तदनुकूलकृतिमत्त्वस्य स्वस्मिन्नभावान्न मल्लो म
ल्लं गच्छतीति प्रयोगः । नन्वत्र परत्वेष कृत्या धर्मस्यान्वयितावच्छेदकावच्छिन्नप्रतियो
गितया भासते योगितामात्रेण वान्वयः । नाद्यः । पृथिवीं प्रयाति स्वर्गमित्यादावनन्वयाप

तोः। स्वजन्यस्पृथिवीत्वावच्छिन्नभिन्नत्वाभावात् न द्वितीयः। स्वात्मन्यपि स्वघटोभयभेदस
त्वात् स्वं प्रपातीत्याद्यापत्तेरिति चेन्न। द्वितीयार्थकत्वे पञ्चम्यर्थस्य स्वाद्यवच्छिन्नत्वावच्छिन्नप्र
6 तियोगिताकत्वसंबंधेन प्रकृत्यर्थस्य कर्मण्यन्वयात् आर्थिकतान्वयेपि न क्षपरत्वे। न्वया लब्ध
त्वं च पृथिवीं प्रपातीत्यादौ पृथिवीव्यक्तिवृत्तिसंयोगजनकत्वं प्रपाणस्य तद्व्यक्ति
मत्त्वं विहगेत्तीति न दोषः। परं तु पृथिवीं प्रपातीत्यादौ पृथिवीपदं कर्मभूततत्तत्पृ
थिवीव्यक्तिपरमेव मन्यत्र कर्मवाचकसामान्यपदं लक्षणया विशेषपरं। इत्थं चान्वयिता
वच्छेदकावच्छिन्नप्रतियोगिताकत्वस्योत्पत्तेर्न भंग इत्याहुः। यत्तु परसमवेतत्वं नार्थः
किं त्वन्योन्याभावप्रतियोगितावच्छेदकत्वं क्रियान्वयि द्वितीयाद्यर्थः। तथा च भूमि
वृत्तिसंयोगजनकभूमिभिन्नैतद्धान्योन्याभावप्रतियोगितावच्छेदकप्रपाणानुकूल ६

कृतिमानित्यर्थः। स्ववृत्तिकृत्याश्रयस्य निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वान्न स्वं जानातीत्या
देरापत्तिरिति। तन्न। एवमपि येन मनसा मनोन्तरं न गतं सोपि मनसो मनो गच्छतीति प्रयोगापत्तेः॥
मनसोन्तरनिष्ठभेदप्रतियोगितावच्छेदिकायास्तन्मनस्त्वरूपायास्तन्मनोभूमिवृत्तिसंयोगजनकत्वा
द्यन्मनस्त्वरूपतेः फलान्वयः॥ तस्या एवान्योन्याभावेन्वयो कौतश्चित्तैत्रत्वादेः प्रकारत्वे शक्तत्या नंत्य
रूपं चित्सीसर्गत्वे उक्तं परसमवेतत्वमेव सम्यक्। अन्योन्याभावस्याव्याप्यवृत्तित्वे प्यक्षतेः॥
एतेन तत्क्रियानधिकरणत्वे सति तत्क्रियावच्छेदकफलशालित्वं कर्मत्वं। द्वितीयादेरपि तत्क्रि
यानधिकरणत्वमर्थ इत्यपास्तं। अनंतशक्त्यापत्तेः॥ ननु। रूपान्वयिपरसमवेतत्वमपेक्ष्य
कर्त्रन्वयिपरत्वमेव लाघवात्कर्मप्रत्ययार्थ इति तन्न। द्वितीयार्थफलसमवेतत्वेकान्वयित्वे
लाघवाज्ज्ञमो गमेः कर्म ननु चैत्र इत्यादौ परसमवेतक्रियाजन्यत्वघटितस्यैव कर्मपदार्थ

7

पातस्यैव कर्मप्रत्ययार्थत्वात् । गम्यते ग्रामः स्वयमेवेत्यादौ परस्मान्वयविरहाच्चेति दिक् । अथै
वमपि पतेरधःसंयोगानवच्छिन्नस्पन्दार्थकतया धात्वर्थतावच्छेदकफलशालित्वेन भूतला
देः कर्मत्वे वृक्षात्पर्णं भूतलं पततीति प्रयोगः स्यादिति चेत्तथा विवक्षायां भवत्येवात एव
द्वितीयाश्रितातीतपततीत्यादिसूत्रेण पतिशब्दयोगे द्वितीयासमासविधानं तदुदाह
रणं तु नरकं पतितो नरकपतित इति साधु संगच्छते । क्वचित्सप्तम्यपि साधुः । यथा भूमौ प
ततीति ग्रामे गच्छतीत्यादौ । परन्तु भूतलादेः कर्मत्वे विना द्वितीया । पतनफलस्य संबंधा
कांक्षात एव तत्स्वीकारात् । अननुकूलस्य धात्वर्थतयोपस्थिते न संबंधाकांक्षा । यद्वा
कर्तृभिन्नान्वयिफलावच्छिन्नव्यापारबोधकस्यैव धातोः सकर्मकत्वं । यथा गम्यादेर्न
तु पतेरधःसंयोगरूपफलस्य पर्णादिवृत्तित्वाद्धद्वृत्तस्य ससंबंधिताकांक्षतया ससंबं ७

धित्वेन पर्णस्यैवान्वयात्. अन्तरितं हि पर्णस्याधो न तु भूतलस्येति भूतलं पततीति प्रयो
गदृष्टान्तः । अथ कथं वृक्षात्पर्णमध्यः प पततीति प्रयोग इति चेत्. भ्रमादिति ब्रू[illegible]· अ
त्यधो विवक्षाया. गतं तिरश्चीनमन्तरुक्तमार्थेः प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः । पतत्यधो धा
म किम्पाशिसन्ततिः किमेतदित्याकुलमीक्षितं जनैरित्यत्र तु नादस्याधो धाम पततीत्यर्थ
न्तदोषः । यत्तु. त्यजिगम्यादेः स्पंदाद्यात्मकव्यापारमात्रे शक्तिः । फलस्य द्वितीयादिभिन्न
त्वात्. अत एव ग्रामं त्यजति ग्रामं गच्छतीत्यनयोर्नैकार्थतात्यजिगम्योर्योजे द्वितीया
दिना विभागसंयोगयोर्बोधनात्. त्यजेर्विभागावच्छिन्नस्पंदशब्दत्वस्य गमेः संयोगा
वच्छिन्नस्पंदशब्दत्वस्य कार्यतावच्छेदकत्वात्. अत एव गमनं त्यागः इत्यनयोरपि नै
कार्थता. उक्तकार्यकारणभावानुरोधेनाग्नापि त्यजिगम्योर्विभागसंयोगावच्छिन्न

स्पंदेनलक्षणास्वीकारात् । विभागाद्यवच्छिन्नस्पंदत्वाद्वत्त्वं च विभागादिस्पंदेऽप्यवैशिष्ट्या
8 न गमहिशब्दत्वं । तेन चैत्रेण ग्रामस्त्यज्यते इत्यादि अन्यस्पंदनविशेषणक विभागादिविशेष्य
कत्वाद्बोधसंग्रहः । इत्थं च परसमवेततज्जन्यार्थत्वान्वयिफलविशेषणतात्वं तज्जन्य
कर्मत्वं । तेन त्यजधातोर्नोत्तरदेशादौ कर्मत्वमिति । तन्न । विभागाद्यवच्छिन्नस्पंदत्वाद्वत्त्व
स्य अन्यतावच्छेदकत्वे तादृशस्पंदस्याऽनुगतत्वे दुर्वचत्वात् । परेषामितरान्वितेतुशक्तिग्रहे इतरांशा
वद्विभागाद्यंशस्य त्यागस्तु न युक्तः । त्यागगमनयोरेकार्थतापारणायतत्तत्फलविशिष्ट
स्पंदे शक्तिसिद्धिं विनापि लक्षणया प्रतिसंधानं तथा प्रतीतेरिति दिक् । एवं ददातेर्मूल्य
ग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागो यजतेर्दैवतोद्देश्यकस्वस्वत्वध्वंसफ
लकत्यागः । जुहोतेस्त्वाहुत्याभिव्यक्तो योर्थः । तादृशत्वं न दैवतोद्देश्यकत्वं । अतएवाह रु

त्विडांतादृशत्यागाभावेविहितत्वं· अग्निप्रक्षेपअग्निसंयोगानुकूलकृत्यनुकूलोघृतादि
द्रव्यनिष्ठोदाहादिव्यापारः न चैवमग्नौ जुहोतीत्यादौसप्तम्यर्थस्याग्निसंयोगेऽन्वयेनिराकांक्षत्वा
तेतिवाच्यं· अत्रसंयोगानुकूलकृत्यनुकूलव्यापारस्यैवधात्वर्थत्वात्· नचतथाप्यग्नौ
कर्मतापत्तिः संयोगस्यधात्वर्थतावच्छेदकतावच्छेदकपातद्वतोऽग्नेः कर्मत्वाभावात्· क्रि
याफलत्वधर्मावच्छेदकतयातत्शालिनोघृतस्यैवकर्मत्वात्· इत्थंचविप्रायगां
ददातिविष्णुपऊरयेघृतंजुहोतीत्यादौमूल्यग्रहणंविनाविप्रोद्देश्यकगोवृत्तिस्वस्व
ध्वंसपरस्वत्वजनकत्यागानुकूलकृतिमान्· विष्णूद्देश्यकस्वस्वत्वध्वंसफल
कत्यागानुकूलकृतिमान्· घृतवृत्त्यग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारानुकू
लकृतिमानित्येवबोधः ।। विप्रोद्देश्यतासंबंधेनस्वस्वत्वध्वंसरूपफलवत्वात्क

मित्वं। एवं मूल्यग्रहणप्रयुक्तस्व[स्व]स्वत्वध्वंसपरस्वत्वजनकस्त्यागो विक्रयः। मूल्यदानप्रयुक्त
स्वस्वत्वोत्पादकस्वीकारः क्रयः। दत्तद्रव्यस्य स्वत्वजनकस्वीकारः प्रतिग्रहः। तथा च
गां विक्रीणाति क्रीणाति प्रतिगृह्णाति इत्यादौ गोकर्तृ मूल्यग्रहणप्रयुक्तस्वस्वत्वध्वं
सपरस्वीयस्वत्वानुकूलत्यागानुकूलकृतिमान् गोकर्तृकमूल्यदानप्रयुक्तस्वत्वानु
कूलस्वीकारानुकूलकृतिमान् गोकर्तृकदत्तद्रव्यस्वत्वजनकस्वीकारानुकूलकृ
तिमान् इति क्रमेणान्वयधीरिति संप्रदायः। इदमत्र बोध्यं। दानस्य परस्वत्वजनक
त्वे तत एव विक्रयादिवारणे मूल्यग्रहणं विनेति व्यर्थं। एवं प्रतिग्रहस्य स्वीकारवि
शेषत्वे तया स्वत्वहेतुत्व… रक्षार्थमिकस्वीकारस्य स्वत्वहेतुत्वकल्पनात् … एव पाठ
नाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेदित्यादिकं साधकं संगच्छते। अन्यथा प्र ७

त्विग्रहवैफल्यापत्तेः। दानं तु स्वस्वत्वध्वंससमानकालीनपरस्वत्वप्रयोजकमिति मत
त्वापि न द्वैयर्थ्यं तदुपादाने प्युपेक्षायामतिव्याप्तेः। तस्या अपि स्वस्वत्वध्वंसद्वाराप
रस्वत्वप्रयोजकत्वात्. तद्धारणापत्त्या जेवैडाल्योपादानस्यावश्यकत्वात्. वस्तुतो दूरस्थं
पात्रमुद्दिश्य[illegible]स्य प्रतिग्रहात् प्राक् स्वामिकस्यातु द्वैध्येन पुरुषेण प्रतिग्रहात्स्वत्वं
स्यात्. अन्यो द्देश्यकस्य [illegible]देः प्रतिबंधकत्वे तु गौरवं. न चैतादृशस्यागोदानाभासए न सं
दानकोहित्यागो दानं संप्रदानं च दद्यस्वे प्रतु मतिप्रकाशनद्धारा दान क्रियाहेतुत्वेन
। न वा सन्निहितस्य तत्त्वमिति न ततो दातुः स्वत्वनाश इति वाच्यं. तीर्थं संप्राप्तिं तं द्र
व्यमन्यत्र प्रदीयते। मन दाता तीर्थफलं भुंक्ते प्रतिग्राही न दोषभाक्। मनसा पात्रमु
द्दिश्य भूमौ तोयं विनिक्षिपेत्॥ विद्यते सागरस्यांतो दानस्यांतो न विद्यते इत्यादि वाक्य

आध्याधानसिद्धेस्तस्माद्दानमेव स्वत्वजनकं प्रतिग्रहप्रागभावस्यापेक्षणीयत्वात्प्र
फ२ तिग्रहं नैवेत्यं। अतएव श्येनेदत्तं तेनाप्रतिगृहे न दातुः स्वत्वनिवृत्तिः। अस्तु वा दत्तद्र
10 व्यस्वीकारस्वरूपप्रतिग्रहत्वेन स्वीकर्तव्यद्रव्यदानत्वेन वेति विनिगमकाभावात्
दानं स्वत्वध्वंसद्वारा प्रतिग्रहश्च स्वत्वजनक उभयथापि ममस्य ग्रहणं विनेति व्यर्थं
विक्रयस्य तु स्वत्वजनकत्वे मानाभावात्. न च विक्रीतद्रव्यस्वीकारत्वं क्रयत्वमि
त्यत्रापि विनिगमनाविरहः मूल्यदानपूर्वकस्वी कारत्वस्यैव क्रयत्वात्. विना
मयत्वस्य गोचरत्वेन निवेशात्. किंच. स्वस्वत्वध्वंसजनकेत्यपि व्यर्थं. अप्रावर्तकत्वा
त्. अपि चाग्निप्रक्षेपो होम इत्युक्तं देवतोद्देशपकस्वस्वत्वध्वंसफलकस्त्यागो यागः।
स एव वषट्कारोपावच्छिन्नो होमः इति वाचस्पतिमिश्राद्युक्तेः। याग एव विशिष्टदेशमक्षे १०

प्रक्षेपो होम इति विवेकोक्तेश्च। अपि च स्वत्वगोत्यागाच्च अमानस्वत्वध्वंसः अनुमतदास्
दित्यागात् विदेशस्थस्यापि स्वत्वध्वंसवत्। वस्तुतो दानत्वयागत्वहोमत्वादयो मानसप्र
त्यक्षगम्या जातिविशेषाः॥४॥ न च श्राद्धस्यापि अपेक्ष्य यागत्वं ब्राह्मणापेक्षया दानत्वमि
ति विवेकोक्तेस्तत्पोषणं कर्मणि निर्वाच्यं। श्राद्धस्य गौणेन तदुभयरूपत्वात्। वस्तुतोश्रा
द्धस्य यागत्वमेव द्विजपि श्राद्धस्य स्वत्वाजनकत्वाद्ब्राह्मणस्य स्वत्वमपि मनसा वेदि
कि ब्राह्मणार्थं भवेपि श्राद्धोक्तेः। पिंडं स्कन्दो विप्रेभ्य इत्यन्यत्रापि तत्प्रतिपत्तेः। विभ
य जलहस्त्यादौ द्वितीयार्थोप्युद्देश्यत्वं तत्त्वं च तस्येदमिस्यारोपज्ञानविषयत्वं। देवतायाः
स्वत्वोपगमे च यागत्वं दानत्वव्याप्यं। होमत्वं यागत्वव्याप्यमिति तु सर्वसिद्धं। देवद्रव्या
दिकमपि यागस्य वेत्यजेनमपकृतेन तपव संस्थले साधारणस्वत्वनाशोतरंस

धारणास्वत्वोत्पादात्तत्रसकलविशेषणसहितस्य न लक्षणातिव्याप्तिरित्यपास्तं. दानत्वेङ्गातेस्त
त्राभावात्परमात्रस्वत्वानुकूलत्वविशेषणासंसाद्धिनिरासइत्यन्ये. तत्र न स्वस्वत्वनाशा०
किंतु परस्वत्वोत्पत्तिमात्रं स्वत्ववतिस्वत्वोत्पत्तिस्तत्रेत्पेच्छया. उक्ते जनकत्वादिति. स्वस्वत्वध्वं
सस्वैकत्वविशेषणादेषतन्निरासइत्यपरे। अदृष्टविशेषजनकत्वंविशेषणान्नद्यादत्ति
रित्यप्याहुः॥ ए एतेनविनियमेविनियमेविक्रियादिलक्षणातिव्याप्तिरित्यपास्तं. विक्रय
त्वादेर्जातित्वात्. मूल्यातिरिक्तद्रव्यग्रहणप्रयुक्तस्वत्वध्वंसपरस्वत्वानुकूलस्यापि
विनियमइत्यन्ये। किमत्रस्वत्वमितिचेदत्रप्रांचः। यथेष्टविनियोगत्वंस्वत्वंतच्चशा
स्त्रानिषिद्धविनियोगोपायोपायः क्रयःप्रतिग्रहादिस्तद्विषयत्वं. तच्च न बहिरिंद्रियवेद्यं.
प्रतिग्रहादेर्मानसज्ञानविषयरूपस्यबहिरिंद्रियायोग्यत्वादित्याहुः॥ [illegible]

११

[illegible]। न चास्तु प्रतिग्रहादिनाशोत्तरमपि स्वत्वव्यवहाराद्दानादिनः स्व-
त्वं नश्यति प्रतिग्रहादितश्चोत्पद्यत इत्यादिप्रत्ययव्यवहारप्रामाण्यानुरोधेन स्वत्वमतिरिक्तमेव
पदार्थः। तच्च स्वत्वं दानादिना नश्यति प्रतिग्रहादितश्चोत्पद्यते तच्च बहिरिंद्रिययोग्यं स्वत्वं च स्वामी-
त्यादिप्रतीतेः। तदीययथेष्टविनियोज्यत्वज्ञानस्य तदीयस्वत्वसाक्षात्कारहेतुत्वान्न यथेष्टविनि-
योगाद्यज्ञानदशायां स्वत्वसाक्षात्कारापत्तिः। वस्तुतस्तु तदीययथेष्टविनियोज्यत्वे तदीय-
स्वत्वव्यभिचारित्वग्रहदशायां तद्ग्रहेऽपि स्वत्वसाक्षात्कारानुदयात्तदीयस्वत्वसाक्षात्कारं प्र-
ति तदीयस्वत्वव्याप्यतदीययथेष्टविनियोज्यत्ववदिदमित्याकारकज्ञानस्य तदीयस्वत्वसा-
क्षात्कारहेतुत्वं वाच्यं। तथा च स्वत्वस्यानुमितिरेव न तु साक्षात्कारः स्वत्वे लौकिकविषयता-
कल्पने लौकिकविषयताशालितत्साक्षात्कारे तादृशविशेषदर्शनादेर्हेतुत्वकल्पने व

गौरवात्वं पश्यामी त्याद्यनुव्यवसायस्य सुरभिचंदनं पश्यामी त्यादिवज्ज्ञानविशेषणांशे लौकि
कविषयत्वावगाही। न चायोग्यत्वकल्पने लौकिकसाक्षात्कारे स्वत्वस्य प्रतिबंधकत्व
कल्पने गौरवमिति वाच्यं· तस्यायोग्यत्वे लौकिकविषयताविरहादेव तत्प्रत्यक्षवारणसंभ
वात्· योग्यत्वे तज्ज्ञोचरलौकिकप्रत्यक्षसामग्र्यास्तज्ज्ञोचरानुमित्यादौ प्रतिबंधकत्वकल्प
ने गौरवाच्चेति प्राहुरित्यलमतिविस्तरेण· तच्च कर्म त्रिविधं· प्राप्यं विकार्यं निर्वर्त्यं च· त
त्र संयोगादिरूपक्रियाजन्यफलशालि प्राप्यं· यथा ग्रामं गच्छतीत्यादौ ग्रामादि· यच्च
असत्ताकमेवावस्थांतरमापद्यते तद्विकार्यं· यथा काष्ठं भस्म करोति सुवर्णं कुंडलं करोति
इत्यादौ काष्ठादि· काष्ठादिपदलक्ष्यस्य काष्ठावयवादेः सत एव भस्मादिरूपावस्थांतरप्रा
प्तेः। यत्तु कृयायत्कर्म नाशकं फलं जनयति तद्विकार्यं· यथा कालं तुनातीत्यादौ काष्ठमि

१२

तंडुलपदल
क्ष्यस्तंडुला
वयवः

ति. तन्न. काष्ठपदलक्ष्यस्य काष्ठावयवस्य कर्मतया कृयापास्तन्नाशकत्वाभावात्. अत्रापि
काष्ठपदस्य काष्ठावयवबोधकत्वे तदारंभकसंयोगविरोधिविभागहेतुक्रियानुकूलकुठारादिव्या
पारोर्थः। तथा च काष्ठावयवव्यक्तिताद्रूप्यविभागहेतुक्रियानुकूलव्यापारानुकूलकृतिमानि
त्यन्वयधीरिति. काष्ठावयवस्य प्राप्यकर्मत्वैवावस्थांतरप्राप्यभावात् विकार्यता. तंडुलं पच
तीत्यादौ ओदनेप्यवयोरूपादिपरावृत्त्यवच्छिन्नतेजःसंयोगः। तथा च धात्वर्थजन्यफलशालि
त्वात् तो वस्थांतरप्राप्ते भयविधकर्मत्वम् ओदनावयवस्य [illegible]. संकीर्णस्थानमुक्तमेवेति
तोयम्। यत् क्रियया निष्पाद्यते तन्निर्वर्त्यम्. यथा कटं घटं वा करोतीत्यादौ कटादिः। अत्र कृञः फ
लावच्छिन्नव्यापारबोधकतया गौणकर्मत्वं. तच्च साध्यता स्वकृतिविषयत्वैः अतएव वीरणं
करोतीत्यादिर्नप्रयोगः। वीरणादावुपादानतास्य कृतिविषयतायामवसत्वात्. पटुकटादि

13 पदस्य कर्त्तृ घटयत्वे धीरासादौ निरूढलक्षणा कथादेर्गौणाकर्मत्वसंभवेपि कारकत्वासंभवा
न्निरूढलक्षणया मुख्यप्रयोगापवादकर्त्तृत्वेन वीरासींकयेतीति मुख्यप्रयोग इति - तन्नश्च
नीतं घटं ग्रामं नातीत्यादौ घटादेरिव कर्मादेरपि गौणाकारकत्वसंभवात् स्तोकं पचतीत्यादौ
क्रियाविशेषणपदोत्तरद्वितीयाविशेषणविभक्तिवत्प्रयोगसाधुत्वाय नामार्थधात्वर्थयो
रभेदान्वयस्वीकारेणाभेदस्यासंसर्गत्वात्तदस्वीकारे तु विशेषणविभक्तिनदत्तमसाभेदा
न्विका. तस्य कारकत्वाभावात्तत्क्रियान्वितकर्तृत्वाद्यन्वितत्वाभावादिति दिक्. करण
त्वं च कारकांतरेऽवारितार्थत्वे सति क्रियाहेतुत्वं. कारकांतरजन्यव्यापारसंबंधावच्छिन्न
क्रियाहेतुत्वाभावः सत्यंतार्थः। कुठारादिकरणजन्यव्यापारकूटाभिदादिहेतुत्वान्नातिव्या
प्तिः। कर्मणस्तु तादृशक्रियाहेतुत्वविरहादेव नातिप्रसंगः। अधिकरणमपि कर्तृकर्म 13

॰पतरश्च्छस्य व्यापारद्वारा क्रियाहेतुः। चैत्रो गृहे स्थाल्यामोदनं पचतीत्यादौ गृहस्थाल्या च
धिकरणं कर्तृकर्मसंयोगद्वारा पाकादिक्रियासाधकं। संप्रदानं स्वानुमतिप्रकाशनेन फ
लेच्छाद्वारा दानक्रियानिमित्तं। अपादानं पतनप्रतिबंधकसंयोगादिनाशकपत्रादिविभागद्वा
रा पतनादिनिमित्तमिति नातिप्रसंगः। न चैवं कुठारादिकरणस्यापि कर्तृकर्मनिष्ठव्यापार
सापेक्षत्वादव्याप्तिः। कोटरकांतरनिष्ठव्यापारसंबंधावच्छिन्नजनकत्वाभावस्य सत्त्वात्
तथा कुठारादिक्रियायाः छिदादिक्रियायां कुठारादेस्तादात्म्येनैव हेतुतया कर्तृनिष्ठव्या
पारसंबंधेनाहेतुत्वात्। न च कर्तृकुठाराभिघातेऽतिव्याप्तिरिति वाच्यं। तस्याच्छेदनमते
लक्ष्यत्वात्। अत एव फलायोगव्यवच्छिन्नं करणं कारणमित्यपि वदंति। वस्तुतस्तु व्यापार
वत्त्वे सति कारणत्वं करणत्वं। न चैवं कार्यमात्रे ज्ञानादौ चादृष्टस्य मनोयोगस्य व्यापार

स्यसत्वादात्मनोऽधिकरणत्वापत्तिः। इष्टत्वात्. उपधेयसंकरेऽपि कर्तृत्वस्वकरणत्व
१५ त्वरूपोपाध्योरसंकराद्व्यवहाराभेदोपपत्तेः। इत्थं चानुमितौ कर्तृप्रज्ञानं करणं परा
मर्षस्य व्यापारस्य सत्वात्. चाक्षुषादौ चक्षुरादितत्संयोगस्य व्यापारस्य सत्वात्. श्रा
वणज्ञाने श्रोत्रमनोयोगस्य व्यापारस्य सत्वान्न कुठारादेस्तस्य शब्दाभावप्रत्यक्षे तस्यापि व्यभिचा
रात्. परे तु. फलानुकूलकर्तृव्यापारवत्त्वं करणत्वं. अस्ति च कुठारादौ छिदानुकूलक
र्तृसंयोगादिमत्त्वं. न चैवं गृहस्थाल्याद्यधिकरणस्यापि कर्तृव्यापारवत्वात्करणत्वा
पत्तिः। इष्टत्वात्. स्थाल्यामन्नं साधयतीत्यादिप्रयोगात्. एवं गवाद्यन्नं साधयति ब्राह्मणो
न साधयतीत्यादिप्रयोगात्तथापि तदिष्टं. चैत्रेणाऽन्नं पचति मैत्रेण वा पचतीत्याद्यप्रयोगा
त्कर्तुः शरीरस्य च वारणाय रूप्यसमवायिभिन्नस्य कृत्यानुकूलकृतिमतोभिन्नत्वेनापि

क्षोव्यं कृतिमत्त्वं समव्याप्येनावच्छेदकतया च तेन शरीरस्यधुक्तासम्भवः भिन्नस्येत्यनेन हस्तादि
संग्रहः। हस्तादिनावच्छिन्नत्वी त्यादिप्रयोगात्. व्यापारवत्त्वं च जनकतया. तेन व्याप्तिस्म
त्यादिसाध्याख्यमित्याहुः।। अत्र परम्परानावच्छिन्नत्वी त्यादौ निरूढकरणत्वं तृतीया
र्थः प्राश्रयत्वेन प्रकृत्यर्थान्वितस्य धात्वर्थे निरूपकत्वेनान्वयः। तथा च परम्परानिष्ठक
रणतानिरूपकाच्छिन्नानुकूलकृतिमानिति वाक्यस्य धीरितिपांचः।। नव्यास्तु. परम्परानावच्छि
न्नत्विनश्च दात्रेणेत्यादौ नञर्थान्वयानुरोधेनानिरूढकरणत्वनिरूपितजन्यत्वमेव
तृतीयार्थः। तस्य च निरूपितत्वेन प्रकृत्यर्थान्वितस्याश्रयतया धात्वर्थेन्वयः। इत्थं च
परम्परानिरूपितं जन्यत्वं दात्रनिरूपितजन्यत्वाभाववद्विच्छिदा मन्वते इत्याहुः। अत्र भि
न्नायस्वरूपादौ तृतीयार्थः तद्वान् स्यन्नवच्छेदकत्वे सति तद्वा व्यतिसमानाधिक

15

णत्वं अस्ति च जटायामतापसव्यावृत्यनवच्छेदकत्वं- शमदमादिमत्त्वस्यैव तद्
न्यूनानतिरिक्तवृत्तित्वात् तदवच्छेदकत्वात्. शमदमादिना तापस इति त्वत्र योगः।
विवक्षात तस्य यावद्योगस्य च वृत्तौ विशेषणोपलक्षणसाधारणं वैशिष्ट्यमेवत्रापि पा
र्थइ ति। अक्ष्णा काणः पादेन खञ्जः इत्यादौ येनांगविकार इति सूत्रेण तृतीया.
येनांगेनांगिनो विकारो हानिराधिक्यं वा तदंगबोधकात् तृतीयेति सूत्रार्थः। एवं
चात्र तृतीयायाः ज्ञप्तित्वमर्थः। तत्र व्युत्पत्तिवैचित्र्यात् काणादिपदार्थैकदेशे विका
रेऽन्वय इति। काणत्वं च बहिरवच्छेदेन चक्षुःशून्यगोलकवत्त्वं जातप्रसंगाद् स्वा
काणत्वे चक्षुष्मत्त्वे गोलकवत्त्वे सतीति यावत्। यदि च बहिरवच्छेदेन चक्षुष्मत्त्वे पितु
पधाताद् एव चाक्षुषं तदोपहतगोलकवत्त्वमेव काणत्वं- अक्षिपदं च चक्षुष्म १५

शोऽकपरं तथाच तादृश्यगोलकवृत्तियच्चक्षुः [illegible] न्यत्वमुपघातोवा तद्विशिष्टगोलकवानि
त्यक्षिणाकाण इत्यस्यार्थः। एवं [illegible] खंजत्वं संस्थानविशेषशून्यपदवत्त्वं तथा च पदवृत्तियन्मथा
विधसंस्थानशून्यत्वं तद्विशिष्टवानिति पादेन खंज इत्यस्यार्थः। मुखवृत्तिलोचनत्रय
वानिति मुखेन त्रिलोचन इत्यस्यार्थः। परंतु अक्ष्णाकाण इत्यादावभेदे तृतीया तथा च
तादृशगोलकाभिन्नं यच्चक्षुः शून्यमुपहतं वा तद्वानिति वाक्यार्थः। एवं त्रिलोचनपदे
लोचन [illegible] त्रयविशिष्टवत्परं तथा च मुखाभिन्नलोचनत्रयविशिष्टवानित्यर्थ इत्या
हुः। धनेन कुलमित्यादौ हेतुत्वे तृतीया कृपान्वयिनिरूपककरणत्वार्थिका [illegible] तृतीया क
रणत्वोक्तृतीयेत्यनेन विहिता। हेतावित्यसूत्रेणानुनामार्थेप्यानीतहेतुत्वार्थिकेति
शेषः। पुत्रेणसहागत इत्यादौ तृतीयायाः कर्मत्वमर्थः। सहशब्दसमभिव्याहृत तथात्वे

र्थः सहशब्दार्थः। एककालीनत्वसंबंधेन तस्याः समभिव्याहृतपदार्थे क्रियायामन्वयः
। तथा च पुत्रकर्तृकागमनसमानकालीनागमनकर्तेत्यर्थः। शिष्येण सह गुरुर्ब्राह्म
णः पुत्रेणापि नासुंदर इत्यादौ सहार्थो ब्राह्मण्यादिसमानकालीनत्वसंबंधेन ब्राह्मण्या
दार्थैकदेशेऽन्वेति। परं तु अत्र सहार्थः साहित्यं एकधर्ममात्रं तृतीयार्थो वृत्तित्वं संख्यामा
त्रं वा। तथा च शिष्यस्य इत्यादि वा नगुरुब्राह्मण इत्यादिबोध इत्याहुः। सहैव दशभिः पु
त्रैर्भारं वहति गर्दभी इत्यादौ पुत्रेषु भारवहनकर्तृत्वाभावेऽपि सहप्रयोगे विद्यमा
ने ...... रादिविद्यमानत्वं सहार्थः। तथा चैककालीनत्वसंबंधेन दशपुत्रव
द्विविद्यमानत्वविशिष्टविद्यमानत्वाश्रय इत्याकारकान्वयबोधः। अत एव विद्यमा
नस्य तत्र तृतीयेति शाब्दिकाः। धान्येन धनी गोत्रेण गार्ग्यः प्रकृत्या चारुरित्या

दीततृतीयाभेदेध्यान्याभिन्नधनवान्गोग्रामिन्नगर्गकुलोत्पन्नः साहजिकरमणीय

तानान्द इत्यर्थः। प्रकृतिपदस्य साहजिकार्थत्वात्‌। चारुपदस्य रमणीयतावद्युक्तत्वाद्

ति दिक्‌। कर्मणा यमभिप्रैति स संप्रदानमिति पाणिनिसूत्रं तत्क्रियाकरणीभूतेन ता

दृशकर्मणा यमभिप्रैति फलभागित्वेनोद्देश्यीकरोति स संप्रदानमिति सूत्रार्थः। करणी

भूतकर्म जन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वमिति फलितं। ग्रामं गच्छतीत्यत्र

गमनक ग्रामजन्यसुखादिभागित्वेनोद्देश्यस्य चैत्रादेस्तत्क्रियायां संप्र

दानत्वाभावात्तद्वारणाय करणीभूतेति। गमनक्रियायां ग्रामस्याकरणत्वान्न दो

षः। ब्राह्मणादौ तूद्देश्यादिकरणमिति प्रकृतसंगतिः। स्वस्वपित्रादिस्वर्गोद्देशेन कृतगो

दानादिस्थले दानजन्यफलभागित्वेनैव स्वस्वपित्रादिरुद्देश्यो न तु गोजन्यफल

मागित्वे नेति न स्वस्वत्वपित्राद्देः संप्रदानत्वं अत एव पित्रे गां ददातीति न प्रयोगः। यदि
17 चादृष्टद्वारा गोरपि जन्यत्वं फले दत्ता गौः स्वस्वत्वपितृस्वर्गमुत्पादयिष्यतीति चाभिसं
धिस्तदा फले कर्मजन्यत्वमदृष्टद्वारकं ग्राह्यं। वस्तुतो धात्वर्थतावच्छेदकत्वेन
फलं विशेष्यं स्वस्वत्वपितृस्वर्गादि फलं तु न तथेत्यदोषः इत्थं च विप्राय गां ददातीत्या
दौ संबन्धित्वेन परेच्छाविषयत्वं चतुर्थ्यर्थः। चैत्रश्चैत्रा धनं ददातीत्यादावार
णोपपदेति। स च धात्वर्थतावच्छेदकफलजन्येति। दातृत्वं द्वितीयार्थः। तथा च वि
प्रसंबन्धेन परेच्छाविषयगोवृत्तिस्वस्वत्वध्वंसपरस्वत्वानुकूलत्यागानुकूल
कृतिमानित्यन्वयधीः। अत्र तज्जन्यफलप्रकारकेच्छापूर्वकत्वं चतुर्थ्यर्थः। यु
त्पत्तिवैचित्र्यात्। तदेकदेशे जन्यत्वे कर्मणो गवादेर्निरूपकतासंबन्धेनान्व १७

न्वयः। तथा च विप्रविषयकगोऽनन्यफलप्रकारेच्छाप्रयुक्तिजो वन्निस्वस्वत्वध्वंस
परस्वत्वानुकूलत्यागानुकूलकृतिमानित्यन्वयधीरिति. तन्न। गो ऽनन्यफल
स्य प्रकृते स्वत्वन्न्यथ तथा विप्रनिष्ठविषयकगोऽनन्यफलप्रकारीकेच्छा तत्पूर्वकत्व
स्य दानेऽसंभवात् तादृशीच्छाया एव नैत्यादिति दिक्. एवं वृक्षकर्मकोदकमासिंच
तीत्यादौ संयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारो धात्वर्थः। तथा च वृक्षवृ
त्येनेच्छाविषयकसंयोगानुकूलद्रवद्रव्यक्रियानुकूलव्यापारानुकूलकृतिमा
नित्यन्वयधीः। अत्र कर्मतास्य धात्वर्थत्वे वृक्षस्य कर्मत्वं स्यात् न तु जलस्य क्रिया
या वृक्षापेक्षयैव परसमवेतत्वात्. न चैवं पयसा वृक्षमासिंचतीति न स्यात्
धात्वर्थतावच्छेदकक्रियाया वृक्षावृत्तित्वादिति वाच्यं. अत्र कर्मतास्यैव धात्व

18

र्थतया धात्वर्थतावच्छेदकसंयोगस्य कर्तृनिष्ठत्वात् द्रव्ययोः संयोग एव वाच्य आत्व

र्थ इति तु न युक्तं · नहि क्रियावच्छिन्नव्यापाराबोधकत्वमात्रं सकर्मकत्वं धा

त्वर्थतावच्छेदकफलव्यधिकरणव्यापारवाचकत्वं सकर्म त्वं चास्यात् ऽत्राऽऽग्रामं नय

तीति वर्द्धिकर्मत्वं स्यादिति भाष्यं शंकनीयं · क्रियांतार्थत्वे फलद्वयाभावात्तादृशक्रि

यानुकूलव्यापारार्थस्ये क्रियायामेव द्वितीयापत्तिरित्याह क्रियावच्छेदकसंयो

गे तु कर्त्रायेत्यादिना तु धर्मिण्यस्य प्रत्ययस्यैवान्वयो नहि इति धात्वर्थस्य मुख्य

विशेष्यत्वात् तुल्यसमभिव्याहृतस्यैव प्रसिद्धत्वात् द्वित्वापारार्थत्वादत

एवाऽऽग्रामं नयतीत्यत्र ग्रामस्य न संप्रदानत्वं · अत्र हि संयोगावच्छिन्नक्रि

यानुकूलव्यापारः प्रेरणादिर्धात्वर्थः । द्वितीयाद्यर्थो वृत्तित्वं संयोगे

ग्राममयपदोत्तरद्वितीयार्थः। अपागामजापदोत्तरद्वितीयार्थोऽन्वेति। तथैव व्युत्पत्तेः। ताद
र्थ्यफलभागित्वेन ग्रामादेरनुद्देश्यत्वान्न संप्रदानता। तथा उद्देश्यविवक्षायां तु ग्रामा
याजां नयतीति भवत्येवेति दिक्। परे तु। त्यज्यमानद्रव्यस्वत्वभागित्वेनोद्देश्यत्वं सं
प्रदानत्वं स्यागो न विलक्षणेऽग्राह्यः। तेन न रजकाय वस्त्रं ददातीत्यादेर्न संप्रदानत्वं। कर्मणा य
न कर्मणा यमभिप्रैति स संप्रदानमिति कर्मणेति सूत्रार्थः। अत एव संप्रदीयते यस्मै
इति संप्रदानसंज्ञा व्यन्वर्थैव। श्राद्धादौ पित्रादेः स्वत्वभागित्वेनोद्देश्यत्वं। किंतु
प्रीतिभागितयेति संप्रदानत्वाभावेन संप्रदाने चतुर्थ्यसंभवात्। नमः स्वस्ति स्वाहा
स्वधालमित्यादिना सूत्रान्तरेण तत्र चतुर्थी। एवं च वृक्षायोदकमासिंचतीत्या
दौ वृक्षादौ संप्रदानप्रयोगो गौणश्चतुर्थी प्राप्त्यर्थः। अत एव ब्राह्मणेऽस्त्रं मुंचति

मित्रा मद्दूतं प्रेषयती त्याद्दौ धात्वर्थतावच्छेदकफलोद्देश्यत्वाभावे पि चतुर्थी। वि
भागानुकूलरूपानुकूलव्यापारो मोचनं. संयोगानुकूलरूपानुकूलव्यापारः
प्रेषणमिति धात्वर्थतावच्छेदकक्रियारूपफलशालित्वेन शत्रुमित्रयोरनुद्दे
श्यत्वात्। इत्थं चोदकादि अन्ययज्ञमानादिभिस्तदादि अन्य [illegible] दुःखादिदूत
जन्यवार्त्ताज्ञानादिफलशालित्वेनोद्देश्यत्वमेव वक्तव्यमित्यादि चतुर्थ्यनुपपत्तेः।
न च युद्धमी तुद्देशेन गुरुपुत्राय दत्ते गुर्वे खे गां [illegible] ददातीति स्यात्. तथापि
नद्दानापामिवक्कत्वात्. अनयवरजक्तांवधित्वस्य तात्पर्यविषयत्वे रजकस्य वस्त्रं
ददातीति प्रयोगः। वस्त्रजन्यफलभागितयोद्देश्यत्वस्य तत्त्वे तु रजकाय वस्त्रं द
दातीति प्रयोगः। न चैवं श्राद्धादिना पितृपित्रादेः प्रीतिभागितयोद्देश्यत्वात् संप्रदानत्व १९

तुर्थ्यैवोपपत्तेर्न मि॰ स्वस्तीत्यादिसूत्रांतरं व्यर्थं॰ यत्किंचित्क्रियाजन्यफलभागित्वे
नोद्देश्यत्वस्यैव गौणसंप्रदानत्वरूपतया नमः पदार्थस्य क्रियात्वाभावेन पृथक्स
त्वप्रयोगयनात्॰ नारदाय रोचते कलहः॰ वैश्याय शतं धारयतीत्यादौ तु न नारदादेः सं
प्रदानता किंतु रुच्यर्थानां प्रीयमाणः धारेरुत्तमर्ण इति सूत्राभ्यां संबंधमात्रे
चतुर्थी॰ तथा च चतुर्थ्याः संबंधो धातुनानुचिराख्यातेन विषयता बोध्यते।
इति नारदस्य रुचिविषयः कलह इत्यादिबोधः। पुनर्दानमंगीकृत्य द्रव्यग्रहणं धन
र्णं॰ वैश्यस्य शतकर्मकतादृशग्रहणाश्रयत्वमित्यर्थः। संप्रदानस्य कारकत्वं
धात्वर्थतावच्छेदकफलनिष्पादकत्वेन दद्धस्वेत्यनुमतिप्रकाशनेन वा कुनि
च्छानुत्पादप्रदानसंपादनेन वेति॰ परे तु॰ त्यागजन्यस्वत्वजनकस्वीकारवत्त्वं सं

प्रदानत्वं. पित्रा दत्ते श्राद्धादौ पित्रादेर्न स्वीकारः। फूत्काय गां ददातीत्यादावपि गौरवं
20 संप्रदानत्वमुद्देश्यत्वरूपमित्याहुः। परकीयक्रियाजन्यविभागाश्रयत्वमपादान
त्वं. वृक्षात् पर्णं पततीत्यादौ पर्णादेरपादानत्ववारणाय परकीयेति. अत्र च
स्पाविभागजनकत्वमन्योन्याभावप्रतियोगित्वं चार्थः। विभागेन्योन्याभावे च
वृक्षोन्वेति. तथा च वृक्षवृत्तिविभागजनकवृक्षवृत्त्यन्योन्याभावप्रतियोगि
ना वृक्षे स्पन्दपतनाश्रयः पत्रमिति वाक्यार्थः। तथा च ध्रुवमपायेपादानमिति सू
त्रे निसृष्टं अपाये विभागे ध्रुवं निष्पन्नं प्रकृतपंचम्यर्थविभागजनकत्वाव
च्छिन्नीयायतनक्रियातदन्यत्वमव्याहतं. स्पंदजन्यविभागाश्रयत्वेन वृक्षा
देरपादानत्वेन वृक्षात् पर्णं स्पंदत इत्यपि स्यादतः क्रियेति सकर्मकधात्वर्थप

रं॰ वृक्षाद्विभजतीत्यादौ तु पंचमी नापादानत्वे न किंतु हेतुत्वे इत्यग्रे वक्ष्यते॰ धात्व
र्थतानवच्छेदकत्वेन विभागो विशेष्यस्तेन वृक्षादित्य अतिरवगइत्यादौ वृक्षादे
र्नापादानत्वं॰ यत्तु॰ विभागावच्छिन्नक्रियायाश्रयत्वं धात्वर्थतया विभागे विभागविशि
ष्टक्रियाजन्यत्वाभावान्नात्र दोष इति॰ तन्न। तर्हि वृक्षसंयोगावच्छिन्नक्रियाय
पततपर्णतयाऽसंभवापत्तेः॰ विभागे कर्मोपलक्षितत्वापातः अन्यस्य वृत्तित्वमन्यत्व
त्वस्य कमितिदिक्॰ वृक्षाद्विभजते इत्यादौ वृक्षस्यावधित्वमपादानत्वं॰ अवधि
त्वं स्वरूपसंबंधरूपं पंचम्यर्थः। अथवा ये विभागे ध्रुवमवधीभूतमित्यपि पाणि
निसूत्रार्थः। तथा च वृक्षनिष्ठावधितानिरूपकविभागाश्रयः पर्णमित्युक्त वा
क्यार्थः। ननु एवं स्वस्माद्विभजत इत्यपि स्यात्॰ स्वप्रतियोगिकत्वविशिष्टसंयोगस्य॰

भागा६

पोगि६

स्यावधिमत्त्वविशिष्टविभागस्यापि चास्मिन्नभावात्. इत्थं चापादानपदं पंचमी
४१ वन्नानार्थमेवेति बोध्यं. धावतोऽश्वात्पतित इत्यादावप्यवधित्वमेव पंचम्यर्थ
इत्यपि कश्चित्. व्याघ्राद्बिभेति शत्रोः परित्रायत इत्यादौ पंचमी नापादाने किंतु भी
त्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टहेतुत्वार्थिका. धातोश्च यथायथं भयं भया
भावश्चार्थः। पंचम्यर्थहेतुत्वं चात्र स्वधर्मिभयत्वपर्याप्तावच्छेदकेन भयेन चेति प्रा
श्रयत्वं व्यापारश्च यथायथमाख्यातार्थः। तथा च व्याघ्रहेतुकभयाश्रय इत्याद्यस्य
शत्रुहेतुकभयाऽभावानुकूलव्यापारवानित्यंतस्यार्थः। इत्थं च हेतुपंचम्ये
वोपपन्नेतीतोऽपप्रकर्षे प्रपंचात्यमिति बोध्यं. एवं कृपादीच्छावास्यपत्नीत्यादौ पं
चम्याश्चार्थः संयोगक्रियानुकूलकृत्याश्रयत्वं. द्वितीयायाश्चात्वर्थव्यापा २१

तथा चाधवन्ति कूपादिनिष्ठाधःसंयोगानुकूलक्रियाविशेषव्यापारविषयककृतिमानित्यर्थो
व्यपास्तः। तिवाक्यार्थो न युक्तः। यत्राहि त्रिक्षणमवस्थायि निरवंडकूपे पतनमेवादेरधःसंयो
गोमानाभावेनासिद्धस्तत्रासंभवात्। अत एव द्वितीयायाः पतनं पंचम्याश्चात्वर्थतावच्छे
दकाभावान्वयित्वं· धातोरभावानुकूलव्यापारोऽर्थः। तथा च कूपवृत्त्यंधपतनाभा
वानुकूलव्यापारविषयककृतिमानित्यर्थोऽपि पास्तः। यदंधस्य पतनमप्रसिद्धं तत्रा
संभवात्। किंतु धातोरभावानुकूलव्यापारः पंचम्या वृत्तित्वं द्वितीयायाः प्रतियोगित्वमनु
नुयोगित्वं वा धात्वर्थतावच्छेदकीभूताभावान्वितमर्थः। अभावश्च कूपादिसमभिव्याहृ
तत्पतनादिनात्तज्जन्याधःसंयोगादिना वा संबंधेन· तथा च कूपवृत्त्यंधप्रतियोगिका
भावानुकूलव्यापारविषयकयत्नवानितिवाक्यार्थः। एवमेतस्मात्प्रासादिवाभ्यादमु

22 मित्रं चाप्यतीत्यादौ पतनविषान्नस्य मित्रस्य च भोजनमप्रसिद्धं तत्रापि भोजनादिसं
बंधेन सविषान्नत्वं हि मित्रप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवान्नित्य
न्वयधीः। परं तु कूपादंधमित्यत्र सविषान्नादमुं मित्रं इत्यत्र च धातोः पतनमाद्यद्वि
तीये भोजनमुभयत्राभावानुकूलव्यापारश्चार्थः। पंचम्याः प्राद्ये ऽवच्छिन्नत्वं द्विती
ये कर्मत्वं उभयत्राद्वित्वं च द्वितीयायाश्च कर्तृत्वमर्थः। धात्वर्थतावच्छेदकीभूते
ऽभावे धात्वर्थपतनादेरधिकरणत्वेनाद्वित्यावच्छिन्नस्य पंचम्यर्थोद्वितीयार्थयोरभ
यस्य प्रतियोगित्वेनान्वयो व्युत्पत्तिवैचित्र्यात्। तथा च पतनसामान्ये यः कूपावच्छि
न्नत्वाद्यकर्तृत्वोभयाभावस्तदनुकूलव्यापारविषयकयत्नवान्नित्याद्यस्य भोजन
सामान्ये यः सविषान्नकर्तृत्वमित्रकर्मत्वोभयाभावस्तदनुकूलव्यापारविषयक २२

स्तदनुकूलव्यापारविषयकयत्नवानितिद्वितीयस्यार्थः। उपाकाङ्क्षान पदार्था
पादौद्वितीयया विषयित्वं लक्षणया घटादिवृत्तित्वं द्वितीयं वा बोध्यते। धा पभोजनादिसं
विषयित्वावच्छिन्नचाक्षुषप्रत्यक्षं तथा च लौकिकप्रत्यक्षसा ये यत्ना कयत्नवानित्य
विषयित्वं घटादिवृत्तित्वोभयाभावस्तत्प्रतियोगिनिरूपको घट इत्यर्थः। अ। के। यतनमाघेटि
चाक्षुषोपनीतभानेपि लौकिकविषयित्वावच्छेदेनाकाङ्क्षाविषयित्वं चैत्रव्यक्तित्वं द्वि
पाभावसत्त्वान्न दोषः। एवमन्यत्रापि प्रसिद्धस्थले बोध्यमित्याहुः। हिमवतो गंगाप्रभ
वतीत्यादौ च पंचम्या हेतुत्वं धातोरुत्पत्तिरर्थ इति युक्तं। तर्हि जनिकर्तुरित्यतएवोप
पत्तौ भुवः प्रभव इति सूत्र वैयर्थ्यप्रसंगात्। किंतु प्रकर्षेण भवनं प्रकाशः आद्यं बहिः प
योगरूपो धात्वर्थः। बहिः पदार्थः प्रकृतेभूखंडं। पंचम्यर्थः संयोगध्वंसाव्यवहितोत्त

23 रक्षणवद्दरित्वं॰ आख्या तादृशाश्रयत्वं॰ तथा च हिमालयसंयोगध्वंसाव्यवहितोत्तरक्ष
णावच्छिन्नपृथिवीसंयोगाश्रयत्ववती गंगेत्यर्थः। वैकुण्ठकाशीतो वा गंगागमनवती तत्प्रयो
जकव्यवहितेति॰ आचेति चेति॰ वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरक्षणावच्छिन्नसंबद्धकाशी २३
संयोगध्वंसाव्यवहितोत्तरक्षणे घटत्वाभावात् तेषु। वल्मीकानामत्वमभवात्तथानुः
खं डमाखं डलस्येत्यादावप्येवमेव॰ तन्नवहि॰ पदार्थो वल्मीका गोर्द्ध देशादिविशे
षः। कुत्रापराजयते शत्रुपालत्वसंग्रहप्रवना त्पराजयते बालहत्यादौ च्यातो हनीयाथो
पंचम्याः कर्मत्वमाख्या तस्याश्रयत्वमर्थः। श्रीहर्ष नमस्कृते त्यस्य यथा कृपावच्छि
न्निवित्तत्वात्॰ असहिष्णुता च द्वेषविशेषो भवाशकत्वरू॰ तथा च घस्यमोजन
जनक भिन्नवाशाकयत्वज्ञान का भिन्नयाघस्य॰ त्याजनविषयक भिन्न व्यापारविषयक २२

वानित्यंतस्यार्थः। विप्राद्धनमादत्त इत्यादौ पंचम्या यथेष्टविनियोगार्थो नतु स्वत्वं। चौराद्धनमादत्त
इत्यादौ चौरस्य स्वत्वाभावेन तदसंभवात्। धातोरपि यथेष्टविनियोगफलकस्वीकारार्थो न तु स्व
त्वजनकस्वीकारः। विप्राद्धनमादत्ते चौर इत्यादौ चौरस्य तदसंभवात्। पंचम्यर्थश्चात्र नियोगोऽव्य
वहितोत्तरत्वसंबंधेन धात्वर्थतावच्छेदके विनियोगेऽन्वेति। अव्यवहितोत्तरत्वं च स्वसमानविषय
कगुरुणांतरीयविनियोगाव्यवहितभिन्नत्वं। तेनः गुरुदत्तः प्रतिग्रहीत्रा विप्रेणादत्तं धनमाद
तरि शूद्राददत इति न प्रयोगः। इत्थं च विप्रीय यथेष्टविनियोगाव्यवहितोत्तरधनवृत्तियथेष्ट
विनियोगफलकस्वीकारवानित्यर्थः। अधर्माज्जुगुप्सत इत्यत्र पंचम्याः कर्मत्वं धातोर्निंदार्थः।
तथाचाधर्मं निंदतीत्यर्थः। अधर्माद्विरमतीत्यादौ धातोः करणानंतरमकरणं पंचम्याः कर्म
त्वमर्थः। तच्च करणेऽकरणे चान्वेति। तथाचाधर्मं पुनर्न करोतीत्यर्थः। धर्मात्प्रमाद्यतीत्यादौ

24

पंचम्या विषयत्वं धातोरनवधानं। आख्यातस्याश्रयत्वं मर्थः। धर्मविषयकाऽनवधानाभावाश्र
यइति वाक्यार्थः। उपाध्यायादंतर्धत्ते शिष्य इत्यादौ धातोः स्वविषयकप्रत्यक्षविरोधिव्यापारा
नुकूलकृतिमान् शिष्य इति वाक्यार्थः। दंडाद्घटो धूमाद्वह्निमानित्यादौ तु पंचमी नापादाने क्रिया
योगाभावात् किंतु जनकत्वज्ञापकत्वरूपे हेतुत्वे। जन्यत्वज्ञाप्यत्वरूपे हेतुमत्त्वे वा हेताविति
सूत्रेणानुशिष्टा। न चैवं जनिकर्तुः प्रकृतिरिति सूत्रं व्यर्थं काष्ठात्पचतीत्यत्रेव दंडाज्जायत इत्या
दावप्युत्पत्तिनिरूपितहेतुत्वार्थकपंचम्या हेताविति सूत्रेणैव संभवादिति वाच्यं। उत्पत्तेरहेतु
कत्वेपि सा बाधकत्वव्यवहारात्। उत्पत्तिरूपधात्वर्थनिरूपितस्वरूपसंबंधस्य हेतुत्वानी
त्मकतया हेताविति सूत्रेणैतदर्थकपंचम्या असंभवादिति। अधिकरणत्वं च न धर्मसंबंधः सं
योगादिरूपसंबंधस्य प्रागप्रसिद्धतया वह्न्यादेरपि कुंडाद्याधारतापत्तेः। न च स्वधर्मसंबंधो २८

धिकरणत्वं कुंडादिकं च न बदरादिधर्म इति वाच्यं । स्वधर्मत्वस्य स्वाधेयत्वरूपतया स्वा
धेयत्वस्य च स्वनिष्ठाधिकरणतानिरूपकत्वरूपस्ये यान्योन्याश्रयप्रसंगात् । नाप्युत्पन्न
प्रस्थितये द्रव्ये वापेक्षणीयस्याधिकरणं । उत्पन्ने द्रव्येऽपेक्षणीयं कार्यस्य समवायिकार
दे ४ णं । क्षितौ च ह्रादेर्म तन्त्वादि । द्रव्ये आत्मादेः समवायिसम्बन्धाद्यादेः स्वरूपसंबंधीति वा
च्यं । अपेक्षणीयत्वस्य कारणत्वरूपत्वे समवायिकारणतावच्छेदकत्वाद् इतेः समवायिकार
णत्वं तु घटत्वादिरूपेण ... घटादौ न संभवति । नापि तद्भिन्नत्वे सति तत्पतन प्रतिबंधक
संयोगवन्मूर्तत्वं । पतनवन्मूर्तस्याधिकरणत्वं ब्रह्मांडादिधारकसंयोगाश्रयेश्वरवा
रणाय मूर्तत्वमुपात्तं । मूर्तमात्रस्य तु विलक्षणतत्संयोगादिमत्त्वं । तेन कस्याचित्पतन
प्रसिद्धावपि नाव्याप्तिः । गुणादेस्तु समवायित्वं समवायादेस्तु स्वरूपसंबंधित्वं । एवं

25 परंपरासंबंधेनापि वक्तव्यमिति वाच्यं। अननुगमात्। सप्तम्या नानार्थत्वस्यान्याय्यत्वा
त्। किंतु प्रणिको ऽश्वादिवदधिकरणाकारकमतीति माक्षिकमाधिकरणत्वं। स्वरूप
संबंधरूपमतिरिक्तं वेत्यन्यदेतत्। एवमाधेयत्वमपि वाच्यं। इत्थं च गेहे स्थाल्यां मोद
नं पचतीत्यादौ पच्यर्थोऽधिःसंतापनं। अधोऽग्निसंयोगानुकूलनकाष्ठवह्न्यादिव्यापाररू
पे के। पच्यर्थोऽग्नितंदुलादिसंयोगरूपपाकजरूपाभित्यादिव्यवहारादित्यन्ये। उभय
थापि गेहादेः साक्षात्तदधिकरणत्वाभावात्कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वरूपं
क्रियाधिकरणत्वं प्रसम्पर्थः। तदाहुः। कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां। उपकु
र्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति। वस्तुतः परंपरया क्रियाश्रयत्वमाधेयं सप्तम्य
र्थः। अत एव प्रांगणस्थे नदीर्घदंडादिना काष्ठादि[illegible]चालनद्वारा गृहमध्ये पाककरणे २५

गृहस्य कर्तृद्वारा क्रियानाश्रयत्वेपि गृहं पचतीति प्रयोगः। वह्निश्चैत्रादेः साक्षात्स्वाकगमनादिक्रिया
श्रयत्वेपि वह्निः पचति चैत्रो गच्छतीत्यप्रयोगापत्तेरं परस्तेनेति। न चैवं क्रियाश्रयत्वस्यैव सम्बन्धत्वे क्रि
योगं विनाभूतले घट इत्यादिप्रयोगो न स्यादिति वाच्यं। इष्टत्वात्। नहि रूपारहितं वायमस्तीति
प्रामाणिकाः। वस्तुतोऽधिकरणत्वमाश्रयमाधेयत्वमात्रं वा सम्बन्धः। क्रियांशस्य चार्थत्वात्त
च यत्र क्रियायामन्वेति तत्र कारकत्वव्यवहारः। अत एव भूतले घट इत्यादिवाक्याद् बोध इति
नैयायिकाः। अत्र भूतलनिष्ठाधिकरणतानिरूपको घट इत्याकारको बोधः। निरूपकत्वं नि
रूपकत्वं च संसर्ग इति प्राञ्चः। एवं सति निरूपकत्वसम्बन्धस्य प्रतियोगितानवच्छेदकत्वाद्भू
तले न घट इत्यादौ नञर्थस्यान्वयासम्भवात्। भूतलनिरूपिताधेयताश्रयो घट इति शा
ब्दबोधं निरूपितत्वमाश्रयत्वं च संसर्ग इति नव्याः। निमित्तसप्तमी निमित्तत्वं त

ध्रौ देश्यत्वं फलत्वेन फलवत्वेनेच्छास्वरूपं· तत्राद्यं· मन्त्राकनिष्ठतौ धूमीकरोमीत्यादौ मन्त्रा
26 कनिष्ठत्वादेः फलत्वात्· द्वितीयं चर्मौलिग्रीपिनष्टीत्यादौ चर्मादेः सिद्धतयास्वत्वरूप
फलवत्वेनैवेष्टत्वात्· तद्व्यापारोऽपत्वेन धात्वर्थेन्वेति· तथा च मन्त्राकनिष्ठतीच्छाप्रयो
ज्यधर्मकरणाश्रयः। चर्मविषयकस्वत्वप्रकारकेच्छाप्रयोज्यपर्द्धीपिकर्मकहननानुकू
लकृतिमानिति च क्रमेण बोधः। एवं सीक्ष्मिपुष्पकन्नकोकृतइत्यादावपि· पुष्पकन्नकोगंध
मगः। सीमान्तस्यांडकोइत्याकडइतिकोशात्· सा च निमित्तात्कर्मसंयोगइत्यनुशासना
त्· यात्विंचित्कर्मप्रकारकबोधजनकत्वानुयोगेप्रयुज्यते· तादृशबोधजनकता च स
कर्मकस्य धातोः कर्मबोधकपदयोगेन यथाग्रीपिनष्टीत्यादौ· अकर्मकस्य तु कर्मवि
शिष्टस्वार्थशतया· यथाऽविद्यारजनीक्षयेऽभ्युदेतीत्यादौऽभ्युदेतीत्यस्योदयांगवि

शिखरमारोहतीत्यर्थात्. अत्र उज्जनीधा यस्यसूर्योदया ज्जन्यत्वेपि निमित्तत्वं ज्ञानावि
शेषत्वेनोद्देश्यतया तेन लोकानां उज्जनीक्षयज्ञानार्थं षडदेतीत्यर्थ इत्येके। एतद्दूषि
वृद्धिपावर्ड्विरश्मिसंसर्गाभावविशिष्टकालत्वस्य उज्जनीत्वात्. सूर्योदयो न र
श्मिसुत्पादेन तत्प्रागभावनाशे विशिष्टकालनाशाद् उज्जनीक्षये प्रयोज्यत्वं संस्क
त्यपेक्षितमित्यन्ये: शारदिपुष्पं क्षिसप्तच्छदादावुत्पत्तिरपि सप्तम्यर्थः। शारदुत्पत्तिकपुष्पा
श्रयाः सप्तच्छदा इत्यर्थः। न च शारदुत्पत्तिकपुष्पाश्रये चंपकादावपि तथाप्रयोगः स्या
दिति वाच्यं. सप्तच्छदस्य पुष्पाश्रयत्वेन तुल्यवित्तिवेद्यतया पुष्पेष्वपि सप्तच्छद
वृत्तित्वं शाभान्ताथ द्यवच्छेदेन शारदुत्पत्तिकत्वस्य व्युत्पत्तिसिद्धत्वात्. चंपकादि
पुष्पत्वावच्छेदेन च शारदुत्पत्तिकत्वाभावेन तथाप्रयोगाभावात्. धातोरेवया

समवायदीपत्वस्वेनलक्षणेतिदिक्. सतिसप्तम्याः सामानाधिकरण्यमर्थः। गुणकर्मा

27 न्यत्वेसतिसत्त्वादित्यादितोगुणकर्मान्यत्वसमानाधिकरणसत्त्वबोधात्. तच्चक्व

चित्कालिकं क्वचिद्देशिकं. तत्राद्यं समानकालीनत्वपर्यवसन्नं. यथा गोषु दुह्य

मानास्वागतो दुग्धास्वागत इत्यादौ। अत्र सप्तम्यर्थसमानकालीनत्वेन दोहनमा

त्रस्य निरूपकत्वेनान्वयः। माहिष्यादिदोहनसमानकालीनेतस्याप्रयोगाभावात्.

नापि गोदोहनस्य गोदोहनत्वेन धातोरनुपस्थितेः किंतु गोविशेषणककर्मविशे

षणस्य दोहनस्य. इत्थं च तादृशदोहनसमानकालीनातीतागमनानुकूलकृतिमानि

त्यर्थः। दुग्धास्वागत इत्यादौ तु न तथान्वयः। आगमनकर्तृदोहनस्यातीत

तया दोहनकर्तृत्वस्यागमने बाधात् किंतु वर्तमानध्वंसप्रतियोगिदोहनकर्म २७

वस्तु गोष्वेति दुग्धासु गोष्वेति विवार्यः। तादृशदोहनविशेषणप्रतियोगित्वविशेषणध्वंसस्य समा
नकालीनत्वं आगमने भासते। तथा चेदृशवर्तमानध्वंसकालीनागमनानुकूलगतिमानि
ति द्वितीययार्थः। एवं गोषु दोहनीयास्वागत इत्यादावपि तादृशप्रतियोगित्वविशेषणप्रा
गभावस्य समानकालीनत्वं भासते। न च समप्यपेक्षि मानकालीनत्वे प्रकृत्यर्थयोरन्वया
पत्तिः। तादृशदोहनकर्मत्वविशिष्टायाः गोस्तादृशस्य विशेषणदोहनाद्या … संबंधेन का
लेन्वयात्। इदं तु बोध्यं। यस्य च भावेन भावलक्षणमिति सूत्रस्य क्रियायाः क्रियांतरं ल
क्षयते इति व्याख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमी तत्सूत्रेणानुशिष्टेति। गुणक
र्मान्यत्वे सति सत्वादिस्याभोनामाधयोः सामानाधिकरण्ये सप्तमी न युक्ता। तथापि गुण
णकर्मान्यत्वे सति सत्वादिरूपभिन्नक प्रयोगदर्शनात् सूत्रं तद्व्याख्यानयोर्भावक्रियापर
त्वमपदे। तथा च यस्य धर्मेण धर्मांतरं निरूपकस्य सामानाधिकरण्येन प्रतिपाद्यते तस्य

१८

कारकवादः

४७५